**अभ्रावकाशिन्** त्रि० अभ्रावकाशोऽस्त्यस्य इनि । गगनमात्रावकाशवति निरावरणे । स्वार्थे कन् । तत्रैव “ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः” मनुः ।

**अभ्रि** स्त्री अभ्रति मलं यस्मात् अभ्र गतौ अपादाने इन् । १नौकामलघर्षणार्थे काष्ठमये कुद्दाले २ कुद्दालभाले च । “खनति भेषजमित्युपक्रम्य । “हिरण्मयीभिरभ्रिभिर्गिरीणामुपसानुषु” अथ० १०,४,१४ । वा ङीप् । अभ्रीत्यप्यत्र

**अभ्रित** त्रि० अभ्रं मेघोजातमस्य तार० इतच् । जातमेघे अम्बरादौ “ददर्श काले दिवसभ्रितामिव” रघुः ।

**अभ्रिय** त्रि० अभ्रे मेघे भवः घ । १मेघोद्भवे, २ मुस्तकभवे, ३गगनभवे च । “व्यभ्रिया न द्युतयन्तो वृष्टयः ऋ०२, ३४,२, । “यदभ्रियां वाचमुदीरयन्ति ऋ०१,१६८,८, ।

**अभ्रेष** पु० भ्रेष–चलने घञ् न०त० । १ न्याय्ये, उचिते । २ चलनशून्ये त्रि० ।

**अभ्व** त्रि० भू–प्राप्तौ क्वन् डिच्च न०त० । महति निरु० । “यच्च ते विश्वागिरयश्चिदभ्वाः” इति ऋ०१,६३,१ ।

**अम** रोगे चुरा० उभय० सेट् अक० पीड़ने सक० । अमयति–ते आमिमत् त । “यक्ष्मा उदरमामयत्” ऋ० १०८६,८ मा च नः किञ्चनाममत्” अथ० ६,२७,२ । अमितः– आन्तः घञादौ क्ति अमः–आमः अमी–आमी ।

**अम** गतौ भोजने भ्वादि०सक०शब्दे च अक०सेट् प० । अमति आमीत् । “किम्पूरपत्निनस्त्वमभ्यमीषि” १०,८६,८ वेदे शपोलुकि ईट् । अमतः अमतिः अमनिसः ।

**अम** पु० अम–रोगे घञ् । १ रोगे “अम–गतौ अच् । प्राणे सर्व्वदागतिमत्त्वातस्य तथात्वम् । “वाग्वै सामैषा सा चामश्चेति वृ० उ० “अमो नामासि अमा हि सर्व्वमिदम् छा०उ० । अमः प्राणः भा० । अमति सहगच्छति । सेवके “याहि राजेवामवाँ” इभेन य० १३, ६ । “अमवान् सेवकान्” वेदी० ४ अपक्वफलादौ न० शब्दर० ।प्राणहेतुत्वात् ५ बले “सेनेव सृष्टामं दधाति” ऋ० १,६६,४,अमं बलम् भा० ।

**अम्** अव्य० चु० अम–क्विप् स्वरादि० । १अल्पे २शीघ्रतायाञ्च

**अमङ्गल** पु०नास्ति मङ्गलं प्रयोजनं यतः । एरण्डवृक्षे । हैम० । कुशलशून्ये त्रि० । न०त० । मङ्गलभिन्ने । अमङ्गलञ्च मङ्गलविरोधि वस्तु । मङ्गलञ्च अभिप्रेतार्थसिद्धिर्मङ्गलमित्युक्त लक्षणं तद्विरोधि अनभिप्रेतार्थसिद्धिः । तथा च अनिष्ट दुःस्वावाप्तिरमङ्गलं मङ्गलस्य हेतोर्विनायकस्तवपाठादेर्मङ्गलत्ववत् अनिष्टप्राप्तिसाधनस्याप्यमङ्गलत्वम् । अमङ्गल साधनं च द्विविधं लौकिकमलौकिकञ्च । लौकिकमिष्टवियोगादि । अलौकिकन्तु अनिष्टसूचकत्वात् अनिष्टसाधनम् न तु कारकम् “गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः इत्युक्तेः “उत्पातेन ज्ञापिते चेति वार्त्तिकोक्तेश्च । अलौकिकमपि त्रिविधं भौमं दिव्यमान्तरिक्षञ्च । तानि च उत्पातशब्दे वक्ष्यन्ते । अमङ्गलसूचकानि लिङ्गानि च कानिचित् साधारणानि कानिचिच्चासाधारणानि नेत्रस्पन्दादीनि तत्र साधारणानि कतिचित् संगृह्य दर्शयन्ते यथा भा०भी०प० । “तथेमानि निमित्तानि भयायाद्योपलक्षये ॥ श्येना गृध्राश्च काकाश्च कङ्काश्च सहिता वकैः । संपतन्ति नगाग्रेषु समवायांश्च कुर्व्वते ॥ अभ्यग्रञ्च प्रपश्यन्ति युद्धमानन्दिनो द्विजाः । क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम् ॥ निर्द्दयञ्चाभिवाशन्तो भैरवा भयवेदिनः । कङ्काः प्रयान्ति मध्येन दक्षिणामभितो दिशम् ॥ उभे पूर्वापरे सन्ध्ये नित्यं पश्यामि भारत ! । उदयास्तमने सूर्य्यं कबन्धैः परिवारितम् ॥ श्वेतलोहितपर्य्यन्ताः कृष्णग्रीवाः सविद्युतः । त्रिवर्णाः परिघाः सन्धौ भानुमन्तमवारयन् ॥ ज्वलितार्केन्दुनक्षत्रं निर्व्विशेषदिनक्षयम् । अहोरात्रं मया दृष्टं तद्भयाय भविष्यति ॥ अलक्ष्यः प्रभया हीनः पौर्णमासीञ्च कार्त्तिकीम् । चन्द्रोऽभूदग्निवर्णश्च पद्मवर्णे नभस्तले ॥ स्वप्स्यन्ति निहता वीरा भूमिमावृत्य पार्थिवाः । राजानो राजपुत्राश्च शूराः परिघबाहवः ॥ अन्तरीक्षे वराहस्य वृषदंशस्य चोभयोः । प्रणादं युध्यतो रात्रौ रौद्रं नित्यं प्रलक्षये ॥ देवताप्रतिमाश्चैव प्रकम्पन्ते हसन्ति च । वमन्ति रुधिरञ्चास्यैः खिद्यन्ति प्रपतन्ति च ॥ अनाहता दुन्दुभयः प्रणदन्ति विशाम्पते । अयुक्ताश्च प्रवर्त्तन्ते क्षत्रियाणां महारथाः ॥ कोकिलाः शतपत्राश्च चाषा भाषाः शुकास्तथा । सारसाश्च मयूराश्च वाचो मुञ्चन्ति दारुणाः ॥ गृहीतशस्त्राः क्रोशन्ति चर्म्मिणो वाजिपृष्ठगाः । अरुणोदये प्रदृश्यन्ते शतशः शलभव्रजाः ॥ उभे सन्ध्ये प्रकाशेते दिशां दाहसमन्विते । पर्ज्जन्यः पांशुवर्षी च मांसवर्षी च भारत ! ॥ या चैषा विश्रुता राजंस्त्रैलोक्ये साधुसम्मता अरुन्धती तयाप्येष वशिष्ठः पृष्ठतः कृतः ॥ रोहिणीं पीडयन्नेष स्थितो राजन् ! शनैश्चरः । व्यावृत्तं लक्ष्म सोमस्य भविष्यति महद्भयम् ॥ अनभ्रे च महाघोरः स्तनितः श्रूयते स्वनः । वाहनानाञ्च रुदतां निपतन्त्यश्रुविन्दवः ॥ खरा गोषु प्रजायन्ते रमन्ते मातृभिः सुताः । अना-